वेदान्ते प्रामाणानि

५

प्रत्यक्षखण्डे प्रमा

प्रस्तावना

भारते आस्तिकनास्तिकभेदेन दर्शनानां विभागः क्रियते। आस्तिकदर्शनेषु वेदान्तदर्शनम् अन्यतमम्। वेदान्तमते षट् प्रमाणानि सन्ति। अस्मिन् पाठे दर्शनं, दर्शनप्रयोजनम्, दर्शनभेदाः, दर्शनभेदेन प्रमाणभेद इत्यादिकं समासेन उपन्यस्यते। किञ्च वेदान्तदर्शने अद्वैतवेदान्तः विशिष्टाद्वैतवेदान्तः द्वैतवेदान्तः इत्यादिविभागाः सन्ति। तथापि वेदान्तदर्शम् इत्युक्ते अद्वैतवेदान्तदर्शनम् इत्येव अत्र मत्वा अद्वैतवेदान्तमते यानि प्रमाणानि तानि अत्र उपवर्ण्यन्ते। अतः एतानि प्रमाणानि अद्वैतवेदान्तदर्शने सम्मतानि इति बोद्धव्यम्।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- दर्शनं किमिति ज्ञास्यति।
- दर्शनभेदान् ज्ञास्यति।
- दर्शनप्रयोजनं ज्ञास्यति।
- पुरुषार्थान् ज्ञात्वा स्वजीवनं यापयितुं विवेकं लभेत।
- प्रमाणपदार्थं बुद्ध्वा प्रमाणस्य महिमानं ज्ञास्यति।
- अद्वैतवेदान्तमते प्रत्यक्षप्रमाणं किमिति ज्ञास्यति।

५.१) दर्शनम्

दृशिर् प्रेक्षणे इति धातोः ल्युट्-प्रत्यययोगेन दर्शनशब्दः निष्पद्यते। प्रेक्षणम् अत्र न केवलं चक्षुषा दर्शनम् अपि तु ज्ञानसामान्यम्। अर्थात् यदपि ज्ञानं बोधः बुद्धिः प्रमा प्रमितिः जायते तत् प्रेक्षणम्।

धातोः अर्थः फलं व्यापारश्च। दृशिधातोः अर्थः ज्ञानरूपं फलम्, तदनुकूलः व्यापारश्च। स व्यापारः फलानुकूलः अर्थात् फलजनकः। अत्र अनुकूलत्वं हि जनकत्वम्। अतः फलस्य व्यापारे अनुकूलत्वसम्बन्धेन अन्वयः भवति।

कृत्यल्युटो बहुलम् इति सूत्रेण ल्युट् प्रत्ययः बाहुलकार्थे भवति। तेन दर्शनशब्दस्य विभिन्ना अर्थाः सम्भवन्ति। तथाहि व्युत्पत्तयः -

दृश्यते अनेन इति **करण**व्युत्पनः दर्शनशब्दः। तदा ज्ञानानुकूलव्यापारकरणं दर्शनम् इत्यर्थो लभ्यते। ज्ञानजनकव्यापारस्य करणं शास्त्रम्। ज्ञानस्य करणानि यानि सुप्रसिद्धानि प्रमाणानि तान्यपि भवन्ति। अतः दर्शनम् तु **शास्त्रम् प्रमाणं** वा।

पश्यति इति **कर्तृ**व्युत्पन्नः दर्शनशब्दः। अर्थात् कर्तरि ल्युट्, ल्युः वा। तदा ज्ञानानुकूलव्यापारवान् दर्शनः इत्यर्थो लभ्यते। ज्ञानजनकव्यापारस्य आश्रयः तु ज्ञाता अर्थात् **प्रमाता**।

यत् दृश्यते तद् दर्शनम् इति **कर्म**व्युत्पन्नः। तदा ज्ञानानुकूलव्यापारजन्यज्ञानस्य विषयः दर्शनम् इत्यर्थो लभ्यते। ज्ञानस्य विषयस्तु **प्रमेयम्** भवति।

दृश्यते इति दर्शनम् इत्यत्र **भाव**व्युत्पन्नः दर्शनशब्दः। ज्ञानुकूलव्यापारजन्यज्ञानम् इति अर्थो लभ्यते। इदं ज्ञानं तु **प्रमा** एव।

इत्थं दर्शनशब्दस्य चतुर्धा व्युत्पत्तिः सम्भवति। एवञ्च दर्शनशब्दस्य **प्रमाणं प्रमाता प्रमेयम् प्रमा** च इत्येते चतुर्धा अर्थाः भवन्ति।

यदा भारतीयदर्शनं नास्तिकदर्शनम् आस्तिकदर्शनं इति शब्दप्रयोगः भवति तदा, यदा चोच्यते दर्शनं पठामि, दर्शनम् अध्यापयामि इत्यादि तदापि दर्शनशब्दस्यार्थः प्रमाणम् अथवा शास्त्रम् इत्येव।

शास्त्रम् -

किं तावत् **शास्त्रम्**। शासु अनुशिष्टौ इति धातोः करणे ष्ट्रन्-प्रत्ययेन शास्त्रशब्दः व्युत्पन्नः। विधिनिषेधभेदेन अनुशासनं द्विविधम्। तथाहि अभियुक्तोक्तिः -

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।

पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥

यत् पुंसः अर्थात् मर्त्यस्य नित्ये प्रवृत्तिम् उपदिशति विदधाति, अनित्ये निवृत्तिम् उपदिशति तत् शास्त्रम्।

५.२) दर्शनानि

भारते आस्तिकनास्तिकभेदेन दर्शनानां द्वेधा विभागः क्रियते। किमास्तिकत्वं किं वा नास्तिकत्वम्। वेदस्य प्रामाण्यं यानि दर्शनानि अङ्गीकुर्वन्ति तानि आस्तिकदर्शनानि। यानि च वेदस्य प्रामाण्यं नाङ्गीकुर्वन्ति तानि नास्तिकदर्शनानि इति विभागः सुबोधः। वेदप्रतिपाद्यं स्वीकुर्वन्ति, समर्थयन्ति, विदधति तानि आस्तिकदर्शनानि। यानि वेदप्रतिपाद्यस्य विरोधं कुर्वन्ति तानि नास्तिकदर्शनानि। नास्तिको वेदनिन्दकः इति मनुमुनिः।

त्रीणि नास्तिकदर्शनानि। षड् आस्तिकदर्शनानि।

नास्तिकदर्शनानि हि - १) चार्वाकदर्शनम् २) जैनदर्शनम् ३) बौद्धदर्शनम्। बौद्धदर्शनस्यापि चत्वारो भेदाः सन्ति। तथाहि १) माध्यमिकदर्शनम् २) योगाचारदर्शनम् ३) सौत्रान्तिकदर्शनम् ४) वैभाषिकदर्शनम् इति। इत्थम् आहत्य नास्तिकदर्शनानि षड् भवन्ति।

षड् आस्तिकदर्शनानि हि - १) न्यायदर्शनम् २) वैशेषिकदर्शनम् ३) सांख्यदर्शनम् ४) योगदर्शनम् ५) पूर्वमीमांसादर्शनम् ६) उत्तरमीमांसादर्शनम् इति। अत्र उत्तरमीमांसापदेन वेदान्तदर्शनं बोध्यते।

५.३) प्रमाणानि

किं दर्शनं कति प्रमाणानि उररीकरोतीति संक्षेपेण उच्यते। तथाहि कारिकाः -

प्रत्यक्षमेकं चार्वाकाः कणाद-सुगतौ पुनः। (आर्हताः प्रत्यक्षमनुमानं चेति)

अनुमानं च तच्चापि साङ्ख्याः शब्दं च ते उभे॥

न्यायैकदेशिनोऽप्येवमुपमानं च केचन।

अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः॥ (माध्वाः प्रत्यक्षं शब्दश्चेति)

अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा।

संभवैतिह्ययुक्तानि तानि पौराणिका जगुः॥

सरलार्थः - चार्वाकाः प्रत्यक्षम् इति एकमेव प्रमाणम् अभ्युपगच्छन्ति। काणादाः वैशेषिकाः, बौद्धाः शाक्याः, आर्हताः जैनाः च प्रत्यक्षम् अनुमानं चेति प्रमाणद्वयम् अभ्युपगच्छन्ति। सांख्याः नैयायिकाः च प्रत्यक्षम् अनुमानं शब्दः चेति प्रमाणत्रयम् अभ्युपगच्छन्ति। केचित् नैयायिकाः तु उपमानमपि अङ्गीकुर्वन्ति। इत्थं नैयायिकाः चत्वारि प्रमाणानि स्वीकुर्वन्ति इति प्रसिद्धिः। मीमांसकैकदेशिनः प्राभाकराः प्रत्यक्षम् अनुमानम् उपमानं शब्दः अर्थापत्तिः इति पञ्च प्रमाणानि प्रस्तुवन्ति। भाट्टमीमांसकाः वेदान्तिनः च प्रत्यक्षम् अनुमानम् उपमानं शब्दः अर्थापत्तिः अनुपलब्धिः इति षट् प्रमाणानि प्रस्तुवन्ति। पौराणिकास्तु प्रत्यक्षम् अनुमानम् उपमानं शब्दः अर्थापत्तिः अनुपलब्धिः सम्भवः ऐतिह्यं च इति अष्टौ प्रमाणानि अभ्युपगच्छन्ति।

पाठगतप्रश्नाः-१

१. दर्शनशब्दस्य व्युत्पत्तिं लिखत।

२. बौद्धमते इदं न प्रमाणम्।

१) अनुमानम् २) प्रत्यक्षम् ३) शब्दः ४) एषु किमपि न।

३. शब्दप्रमाणम् एते नाङ्गीकुर्वन्ति।

१) पौराणिकाः २) वेदान्तिनः ३) भाट्टाः ४) बौद्धाः

४. अनुमानप्रमाणम् एते नाङ्गीकुर्वन्ति।

१) चार्वाकाः २) वेदान्तिनः ३) भाट्टाः ४) बौद्धाः

५. अर्थापत्तिप्रमाणम् एते नाङ्गीकुर्वन्ति।

१) पौराणिकाः २) वेदान्तिनः ३) भाट्टाः ४) नैयायिकाः

६. प्रत्यक्षम् अनुमानं चेति द्वे एव प्रमाणे इति के न वदन्ति।

१) चार्वाकाः २) वैशेषिकाः ३) आर्हताः ४) नैयायिकाः

७. स्तम्भयोः स्थितान् परस्परसम्बद्धान् मेलयत।

क-स्तम्भः	ख-स्तम्भः
१) प्रमाणम्	क) दृश्-धातोः भावे ल्युट्
२) प्रमाता	ख) दृश्-धातोः कर्मणि ल्युट्
३) प्रमेयम्	ग) दृश्-धातोः करणे ल्युट्
४) प्रमा	घ) दृश्-धातोः कर्तरि ल्युट्
५) आस्तिकदर्शनम्	ङ) वेदस्य प्रामाण्यं नाभिमतम्
६) नास्तिकदर्शनम्	च) वेदस्य प्रामाण्यम् अभिमतम्

५.४) पुरुषार्थः

सर्वेऽपि प्राणिनः इष्टं प्राप्तुम् इच्छन्ति। अनिष्टं परिहर्तुम् इच्छन्ति। किमिष्टम् किं वा अनिष्टम्। सुखम् इष्टम् दुःखं हि अनिष्टम्। अत एव सुखस्य उपायः अपि इष्टः। दुःखस्य उपायः अपि अनिष्टः।

सर्वेऽपि प्राणिनः सुखं लब्धुं दुःखं च दूरीकर्तुं प्रयतन्ते। सुखं द्विविधम्। नित्यम् अनित्यं च। नित्यं सुखम् आत्मसुखम्। तत् जन्यम् नास्ति। न केनापि कारणेन तत् सुखम् उत्पद्यते। तत् सुखम् तु आत्मस्वभावः एव। अनित्यम् सुखम् जन्यम् अस्ति। तस्य किमपि कारणम् अस्ति। अनित्यसुखस्य कारणं हि धर्मः। धर्मं विना सुखं नैव भवति। धर्मोऽपि जन्यः अस्ति। वेदविहितयागादिः धर्मः। तद्यागादिजन्यः पुण्याख्यः अदृष्टविशेषो वा धर्मः। धर्मः अन्तःकरणे विद्यमानः कश्चित् गुणविशेषः। अथवा स्वर्गादिरेव धर्मः।

दुःखस्य किमपि कारणं तु स्यादेव। सुखं वा दुःखं वा कारणं विना नैव उत्पद्येते। सुखस्य किं कारणम् इति यथायथम् असन्दिग्धं च ज्ञानम् आवश्यकम्। तेन इष्टं यत् सुखं तस्य यत् साधनं तत्र निष्ठया प्रवृत्तिः भवेत्। किञ्च सुखस्य कति भेदाः सन्ति तदपि स्पष्टं जानीयात्। इत्थम् 'इदं मदिष्टसाधनम्' इति ज्ञानम् प्रवृत्तिं प्रति कारणं भवति।

अर्थ्यते इति अर्थः। पुरुषस्य अर्थः पुरुषार्थः। अथवा पुरुषेण अर्थ्यते स पुरुषार्थः। अर्थात् पुरुषः नरो वा नारी वा यद् कामयते इच्छति अर्थयते स एव पुरुषार्थः।

पुरुषः सुखमेव अर्थयते। अतः सुखमेव हि पुरुषार्थः सकलप्राणिसाधारणः। सुखस्य प्रकाराः सन्ति। अतः एव पुरुषार्थस्य प्रकाराः सन्ति। नित्यसुखं हि मोक्षः कथ्यते। अनित्यसुखं हि कामः कथ्यते। कामस्य कारणं हि धर्मः कथ्यते। धर्मस्य साधनं हि अर्थः कथ्यते। अर्थो हि धर्मस्य सामग्री धनादिकम्। एवं धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः सुप्रसिद्धा वैदिकसंस्कृतौ। तेषु काममोक्षौ मुख्यौ।

कामस्य साक्षात् कारणं धर्मः। धर्मस्य प्रयोजकः अर्थः। कामलाभाय एव धर्मः अर्थः च सेव्यते नान्यथा। अतः धर्मार्थौ गौणौ। मुख्ययोः काममोक्षयोः अपि मोक्षः नित्यः। अतः मोक्षः एव परमः पुरुषार्थः। अर्थः अनित्यः इति प्रत्यक्षेण ज्ञायते। इन्द्रियजन्यं सुखम् क्षणिकम् इति तदपि अनित्यमेव इति अनुभवसिद्धम्। अनित्यसुखस्य कारणं धर्मः अपि अनित्यः एव। न हि कारणसत्त्वे कार्याभावः भवति।

वेदान्ते श्रुतिः तदनुकूला युक्तिः अनुभवश्च इति एतत् त्रितयम् सदा प्रमाणत्वेन उपन्यस्यते।

कामादीनाम् अनित्यत्वे श्रुतिः प्रमाणम् - तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते। (अर्थः - इह अस्मिन् लोके धर्माधर्मकर्मनिर्मितः लोक्यते इति लोकः घटादिः यथा क्षीयते तथा लोकान्तरे पुण्यनिर्मितः लोकः स्वर्गादिः नश्यतीति।)

तथा च स्मृतिः - ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति। (गीता ९.२१) (अर्थः - ये पुण्यम् आसाद्य स्वर्गं गच्छन्ति ते विशालं विस्तीर्णं स्वर्गलोकं भुक्त्वा यदा तद्भोगजनकं पुण्यं क्षीणं भवति तदा मर्त्यलोकम् मनुष्यलोकं विशन्ति जनिं लभन्ते।) अत्र गीतोक्तेः इदं स्पष्टं यत् पुण्यं क्षीणं भवति। अर्थात् धर्मः पुण्यम् अनित्यम् अस्ति। अतः तज्जन्यम् सुखम् कामः अपि अनित्यः एव।

तथाहि युक्तिः - यत्कृतकं तदनित्यम् इति नियमः दृष्टानुमानोभयसिद्धः। धर्मः कर्मजन्यः। अतः अनित्यः। कामः धर्मजन्यः। अतः अनित्यः। धर्मलाभः कथं भवतीति जैमिनिमुनिप्रणीते धर्ममीमांसाशास्त्रे सविस्तरं वर्णितमस्ति। तत्र प्रथमं सूत्रम् - अथातो धर्मजिज्ञासा इति।

इत्थं सिद्धम् यत् मोक्षः एव परमः पुरुषार्थः नित्यत्वात्। मोक्षः ब्रह्मज्ञानाद् भवति इति अद्वैतवेदान्तस्य सिद्धान्तः। अतः ब्रह्म किम्। तज्ज्ञानं किम्। तल्लाभस्य प्रमाणं किमिति जिज्ञासा। तन्निवृत्तये अद्वैतवेदान्तमतानुकूलानि प्रमाणानि निरूप्यन्ते। एतानि प्रमाणानि एव एतेषां पाठानां प्रधानं विषयः।

पाठगतप्रश्नाः -२

८. सर्वे प्राणिनः किमच्छन्ति।

९. सर्वे प्राणिनः किं नेच्छन्ति।

१०. सुखं कतिविधम्। किं च तत्।

११. किं नित्यसुखम्।

१२. किमनित्यं सुखम्।

१३. अनित्यसुखस्य कारणं किम्।

१४. दुःखस्य कारणं किम्।

१५. प्रवृत्तिं प्रति किं ज्ञानं कारणं भवति।

१६. पुरुषार्थपदस्य व्युत्पत्तिः का।

१७. पुरुषार्थाः कति के च।

१८. गौणमुख्यभेदेन पुरुषार्थान् लिखत।

१९. मोक्षस्य परमपुरुषार्थत्वे को हेतुः।

२०. मोक्षः कस्माद् भवति।

५.५) ज्ञानम्

५.५.१) प्रस्तुतिः

ज्ञानम् बोधः प्रमा प्रमितिः बुद्धिः प्रतीतिः इति प्रायः समानार्थकाः शब्दाः।

लौकिके व्यवहारे 'अयं ज्ञानी', 'स बहु जानाति', 'असौ बुद्धिमान्' इत्यादीनि वाक्यानि प्रयुज्यन्ते। 'अयम् अधिकं जानाति' इति वाक्ये ज्ञानशब्दस्य यः अर्थः स शास्त्रे अभिप्रेतः नास्ति। शास्त्रे यद्यपि बहूनि लक्षणानि ज्ञानस्य कृतानि तथापि सामान्यतः ज्ञानं किमिति तु बोद्धव्यम्। प्रमाणादिविषयस्य पठनाय सुबोधाय च बहूनि पारिभाषिकपदानि प्रयुज्यन्ते। तेषां विषये स्पष्टं ज्ञानम् अपेक्षितम्। अतः इतः परं तानि प्रस्तूयन्ते।

५.५.२) ज्ञानम्

प्रथमम् ज्ञानम् कथम् उत्पद्यते इति प्रक्रिया प्रदर्श्यते।

मम सम्मुखे घटः अस्ति। चक्षुर्भ्याम् घटं पश्यामि। यावत् घटं पश्यामि तावत् अन्यत्र स्थितं पटं न पश्यामि। यदा अन्यत्र स्थितं पटं पश्यामि तदा पूर्वघटम् अन्यत्र स्थितं घटं वा न पश्यामि। एवम् एकस्य पदार्थस्य यदा भानं भवति तदा अपरस्य पदार्थस्य तत्क्षणे भानं न भवति। पटदर्शनानन्तरम् पुनः तमेव घटं पश्यामि चेद् उत्तरक्षणे घटज्ञानम् भवितुमर्हति। परन्तु एककालम् इन्द्रियस्य येन पदार्थेन सम्बन्धः अस्ति तस्यैव भानं भवति, नान्यस्य। तस्मिन् क्षणे उत्पन्नं भानमेव बोधः, ज्ञानम् कथ्यते। यदा घटं पश्यामि तदा घटज्ञानम् अर्थात् घटविषयकं ज्ञानम् अस्ति। तदा पटज्ञानं नास्ति। यदा पटं पश्यामि तदा पटज्ञानम् अस्ति। किन्तु तदा घटज्ञानं नास्ति। यद्यपि पूर्वक्षणे घटज्ञानम् आसीत् तथापि वर्तमानक्षणे तु पटज्ञानम् अस्ति, घटज्ञानं नास्ति। वर्तमानक्षणे यद् भानं तदेव ज्ञानम्। पूर्वक्षणे एकम् ज्ञानम् उत्पन्नम् द्वितीयक्षणे वर्तमानक्षणे द्वितीयं ज्ञानम् उत्पन्नम्। परन्तु पूर्वक्षणस्य ज्ञानम् इति वर्तमानक्षणेऽपि ज्ञानम् इति न उच्यते। अतः घटदर्शनानन्तरम् यदा पटं पश्यामि तदा घटपटयोः ज्ञानम् अस्ति इति न उच्यते। ननु यदि बहुक्षणम् यावत् एकमेव विषयम् पश्यामि चेत्। यदि घटमेव निरन्तरम् किञ्चित् कालं पश्यामि तदा तु तावति कालांशे सर्वेषु क्षणेषु विद्यमानं ज्ञानम् एकमेव। एकमेव ज्ञानं निरन्तरम् अस्ति। अर्थात् प्रतिक्षणं भिन्नभिन्नविषयाणां ज्ञानं भवति चेत् प्रतिक्षणं ज्ञानं भिन्नम्। एवञ्च वर्तमानक्षणे यद् ज्ञानं तदेव ज्ञानम्। पूर्वक्षणेषु उत्पन्नं ज्ञानम् वर्तमानक्षणे ज्ञानत्वेन गृह्यते। यथा एकं पुस्तकं पठितम्। ततः परं अपरं पुस्तकं पठति, घटं वा पश्यति। तदा प्रथमपुस्तकस्य ज्ञानं तस्य अस्ति इति शास्त्रीयशैल्यां न कथ्यते। यतो हि वर्तमानक्षणे तस्य अन्तःकरणे वर्तमानज्ञानमेव अस्ति।

५.५.३) अनुभवः संस्कारः स्मृतिः च

ज्ञानस्य यो विषयः सः अर्थः पदार्थः ज्ञेयः ज्ञातव्यः प्रमेयः वा कथ्यते। यदा विषयस्य ज्ञानं भवति तदा कदाचित् अपेक्षाबुद्धिः भवति, कदाचित् उपेक्षाबुद्धिः भवति। यथा नगरादिषु गमनकाले बहून् जनान् गृहाणि वृक्षान् च पश्यामः। परन्तु तेषां दर्शनं भवतु इति मनोभावः नास्ति। तत्र दर्शनं भवति चेत् भवतु, न भवति चेन्न भवतु इति उदासीनमनोभावः अस्ति। अर्थात् दर्शनस्य उपेक्षा अस्ति। परन्तु यदा किमपि स्थलं भवनम् दुर्गं दृश्यम् वा द्रष्टुं गच्छामः तदा तु तत्र अवधानम् अस्ति। किञ्च परवर्तिकाले वदामः यद् 'अहं तत्र दुर्गं दृष्टवान्। दुर्गे राजप्रासादम् दृष्टवान्। मन्दिरं दृष्टवान्। मन्दिरम् अति प्राचीनम् अस्ति' इत्यादि। परन्तु मार्गे यान् जनान् वृक्षान् वा दृष्टवन्तः तान् न तथा सम्यक् स्मरामः परवर्तिकाले। परवर्तिकाले यदा स्मरणं स्मृतिः वा भवति, तदा तु न स दुर्गः, न वा तद् मन्दिरं सम्मुखे अस्ति। तथापि तद्विषयकं स्मरणं भवति। अत एव वयं तत्र दृष्टानाम् बहूनाम् दृश्यानाम् वर्णनं कर्तुं प्रभवामः। तर्हि पूर्वदृष्टस्य किमपि चिह्नम् , कश्चित् संस्कारः अन्तःकरणे उत्पन्नः। तत् चिह्नम्, स संस्कारः एव परवर्तिकाले स्मृतिं प्रति कारणं भवति। यदा दुर्गदर्शनं भवति तदा दर्शनेन यद् यद् ज्ञानम् उत्पद्यते तद् सर्वमपि ज्ञानम् अनुभवः इति कथ्यते। अयम् अनुभवः अपेक्षाबुद्धिवशात् अन्तःकरणे किमपि चिह्नं, कमपि संस्कारं करोति। स संस्कारः एव उद्बुद्धः भवति चेत् स्मृतिं जनयति, उत्पादयति। संस्कारस्य उद्बोधार्थम्, जागृत्यर्थम् अपि किमपि कारणम् आवश्यकम्। यथा पर्यटनम् समाप्य आगतम् माम् मित्राणि पृच्छन्ति, किं किं दृष्टमिति। तदा अहं मित्रेभ्यः दृष्टानि दृश्यानि वर्णयामि। अर्थात् अहं स्मारम् स्मारं कथयामि। अत्र मित्राणां प्रश्नवशात् संस्कारः उद्बुद्धः भवति, विजृम्भते, स्फुरति। स संस्कारः स्मृतिं जनयति, उत्पादयति।

एवम् अपेक्षाबुद्धिसहकृतः अनुभवः संस्कारं जनयति। स संस्कारः उद्बोधकवशात् स्मृतिं जनयति।

इत्थम् ज्ञानम् द्विविधम् - अनुभवः स्मृतिः च।

यदा पुरा अन्यत्र दृष्टम् मन्दिरादिकम् अहम् अधुना स्मरामि तदा यद् ज्ञानं तत् स्मृतिः। स्मृतिभिन्नम् ज्ञानम् हि अनुभवः।

यः जानाति स ज्ञाता कथ्यते, यस्य प्रमा भवति स प्रमाता कथ्यते। ज्ञाता एव प्रमाता।

लौकिके व्यवहारे 'अयं ज्ञानी जनः' इति यदा वदन्ति जनाः तदा तस्यार्थः भवति यद् अयं जनः बहून् विषयान् ज्ञातवान्। यदा ज्ञातवान् तदा तद् ज्ञानम् तस्य अन्तःकरणे संस्कारम् अकरोत्। यदि स वाञ्छति तर्हि संस्कारस्य साहाय्येन सः अधुना बहून् विषयान् स्मर्तुं शक्नोति। अतः अयं जनः ज्ञानीति। परन्तु वर्तमानक्षणे स सकलविषयान् जानाति इति शास्त्रीयशैल्या वक्तुं न शक्यते। एवम् अयं ज्ञानी इत्यस्य अर्थः अयम् अनुभवजन्यसंस्कारवान् इत्यर्थः।

५.५.४) प्रमा प्रमाता प्रमेयः

ज्ञानस्य विषयः अर्थः पदार्थः ज्ञेयः ज्ञातव्यः प्रमेयः वा कथ्यते इति उक्तमेव। दोषरहितं ज्ञानमेव प्रमा इति सामान्यतः कथ्यते। तादृशज्ञानस्य विषयः एव प्रमायाः विषयः। प्रमायाः विषयः एव प्रमेयः इति कथ्यते। प्रमेयस्य प्रमा यस्य भवति स प्रमाता, ज्ञाता। अर्थात् यत्कर्तृकं प्रमेयविषयं ज्ञानं भवति स प्रमाता। यः यः प्रमायाः विषयः अर्थात् प्रमेयः तस्य किमपि नाम भवति, भवितुम् अर्हति। नाम एव अभिधेयम् कथ्यते। यस्य नाम सः अभिधेयः, अर्थः वा कथ्यते। नाम किमपि पदमेव भवति। अतः पदद्वारा यः अर्थः प्रकट्यते स एव पदस्य अर्थः, पदार्थः। अर्थात् पदबोध्यः अर्थः हि पदार्थः।

एतावता लौकिकव्यवहारस्य सामान्यतः शास्त्रीयं विवेचनं प्रदर्शितम्। परन्तु वेदान्तशास्त्रे इतोऽपि अधिकः भिन्नः च विषयः अस्ति। स क्रमशः अधस्तात् उपन्यस्यते।

यथार्थज्ञानमेव प्रमा भवति। अयथार्थज्ञानम् अप्रमा कथ्यते, भ्रमः कथ्यते।

ज्ञानस्य प्रकारद्वयम् - अनुभवः स्मृतिः च। वेदान्तनये स्मृतिः न प्रमा। प्रमायाः भावः प्रमात्वम्। इदं प्रमात्वम् स्मृतौ न वर्तते।

५.५.५) लक्षणलक्षणम्

यस्य लक्षणं तदेव लक्षणस्य लक्ष्यम् भवति। यः विषयः ज्ञापनीयः तस्य विषयस्य किमपि चिह्नं लिङ्गं ज्ञापकं वा उच्यते। तद् लिङ्गमेव लक्षणम्। लक्ष्यते ज्ञायते अनेन इति लक्षणम्। यस्य लक्षणं भवति तत् लक्षितं लक्ष्यम् वा उच्यते। लक्षणं कोऽपि धर्मः भवति। यस्मिन् धर्मे अव्याप्तिः अतिव्याप्तिः असम्भवः चेति त्रयो दोषाः न भवन्ति स एव असाधारणः धर्मः लक्षणम् उच्यते। लक्ष्ये लक्षणम् अस्ति चेत् लक्षणसमन्वयः कथ्यते। लक्ष्यैकदेशवृत्तित्वे सति लक्ष्यापरदेशावृत्तित्वम् अव्याप्तेः लक्षणम्। यावल्लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वम् अतिव्याप्तेः लक्षणम्। लक्ष्यमात्रावृत्तित्वम् असम्भवस्य लक्षणम्। एतानि सोदाहरणं विशदीयक्रियन्ते।

अव्याप्तिः - लक्ष्यैकदेशवृत्तित्वे सति लक्ष्यापरदेशावृत्तित्वम् अव्याप्तेः लक्षणम्। गोः कपिलत्वं लक्षणं कृतं चेत् कपिलासु गोषु वर्तते किन्तु शुक्लगोषु न वर्तते। अतः लक्ष्यीभूतासु गोषु एकदेशे वर्तते अपरदेशे न वर्तते इति अस्य लक्षणस्य अव्याप्तिः दोषः।

अतिव्याप्तिः - यावल्लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वम् अतिव्याप्तेः लक्षणम्। शृङ्गम् गोः लक्षणं कृतं चेत् सर्वासु गोषु शृङ्गमस्ति किन्तु अलक्ष्ये महिषादौ अपि अस्ति। यावति लक्ष्ये यद्यपि वर्तते तथापि अलक्ष्ये गोभिन्ने महिषादौ अपि वर्तते इति शृङ्गम् लक्षणम् अतिव्याप्तिदोषेण दुष्टम्।

असम्भवः - लक्ष्यमात्रावृत्तित्वम् असम्भवस्य लक्षणम्। गोः चतुर्षु पादेषु प्रतिपादं शफद्वयम् भवति। शफम् खुरः कथ्यते। आहत्य अष्टौ खुराः भवन्ति एकस्याः गोः। तत्र यदि गोः लक्षणं कृतं यद् यस्य एकपादे एकः एव शफः सा गौः। तदा सकलासु गोषु क्वापि एकपादे एकः शफः नास्ति। अतः लक्ष्यमात्रे अवर्तमानम् इदं लक्षणम्। अतः तद् असम्भवदोषेण दुष्टमिति बोध्यम्।

स्वरूपं लक्षणं च – स्वस्य आत्मनः रूपम् स्वरूपम्। स्वात्मकः पदार्थः। यथा घटस्वरूपम् द्रव्यम्। लक्षणे एकाधिकानि पदानि भवितुम् अर्हन्ति। यथा रूपरहितः स्पर्शवान् वायुः इति। वस्तुतः रूपरहितः स्पर्शवान् इति वायोः स्वरूपम्। वायोः लक्षणन्तु रूपरहितत्वे सति स्पर्शवत्त्वम् इति। सुन्दरम् सुगन्धवत् पुष्पम् इति पुष्पस्य स्वरूपम्। सुन्दरत्वे सति सुगन्धवत्त्वं पुष्पस्य लक्षणम्। एवं स्वरूपलक्षणयोः प्रकटने भेदः बोद्धव्यः। गन्धवती पृथिवी इति पृथिव्याः स्वरूपम्। गन्धवत्त्वम् पृथिव्याः लक्षणम्। एवं प्रकटने वैचित्र्यम् अवधेयम्।

दलकृत्यम् - लक्षणे यानि पदानि सन्ति तेषु एकैकमपि पदम् सार्थकम् न वा इति परीक्षा क्रियते। तदा एकैकम् पदम् लक्षणशरीरात् अपसार्य अवशिष्टांशः यदि लक्षणशरीरं तर्हि को दोषः जायेत इति परीक्ष्यते। दोषो जायते चेत् अपसारितं पदम् आनीय लक्षणशरीरे निवेश्य स्थितस्य लक्षणस्य परीक्षा क्रियते। उपस्थितः दोषः एवं पदनिवेशेन अपगच्छति चेत् तत् पदं सार्थकम्। इत्थम् परीक्षया पदस्य सार्थक्यप्रदर्शनम् एव पदकृत्यं दलकृत्यं वा कथ्यते।

पाठगतप्रश्नाः -३

२१. अनुभवः कः।

२२. संस्कारः कः।

२३. स्मृतिः का।

२४. ज्ञानस्य यो विषयः स किमिति कथ्यते।

२५. कीदृशः अनुभवः संस्कारं जनयति।

२६. कः समन्वयः।

२७. कः असाधारणधर्मः।

२८. का अव्याप्तिः।

२९. का अतिव्याप्तिः।

३०. कोऽसम्भवः।

५.५.६) उपलक्षणम् उपाधिः विशेषणं च।

वेदान्ते उपलक्षणम् उपाधिः विशेषणम् इति शब्दानां प्रयोगस्य प्राचुर्यम् अस्ति। अतः उपाधिः कः इति आदौ बोद्ध्यम्।

एकत्र बहूनि विविधवर्णयुक्तानि उत्पलानि सन्ति। तत्र चैत्रः नाम कश्चित् जनः मैत्राय 'उत्पलम् आनय' इति वदति। तदा तेषु यत्किमपि एकम् उत्पलम् आनयेत् मैत्रः। परन्तु यदि चैत्रः वदेत् यत् नीलम्

उत्पलम् आनय इति। तदा मैत्रः अन्यानि उत्पलानि विहाय केवलम् नीलम् एव उत्पलम् आनयति। रक्तादिभ्यः उत्पलेभ्यः नीलपदम् अत्र नीलम् उत्पलम् पृथक्कृत्य बोधयति। इदं पृथक्करणम् एव व्यावर्तनम् इति उच्यते। यः पदार्थः वस्तु धर्मः वा इत्थं व्यावर्तयति स व्यावर्तकः इति कथ्यते। व्यावर्तकः यस्मिन् आश्रितः भवति तेषाम् आश्रयाणां परस्परभेदानुमितिजनकः भवति। नीलम् उत्पलम् इत्यत्र नीलपदम् इतरेभ्यः रक्तादिभ्यः उत्पलेभ्यः भिन्नम् इति इतरेभेदानुमितिं जनयति इति तद् व्यावर्तकम्। व्यावर्तकम् व्यावृत्तिम् करोति। व्यावृत्तिः हि इतरभेदः।

उपलक्षणम् उपाधिः विशेषणम् इति एतत् त्रयमपि व्यावर्तकम् भवति।

उपलक्षणम्

अवर्तमानत्वे सति व्यावर्तकत्वम् उपलक्षणस्य लक्षणम्। उपलक्षणम् लक्ष्ये न वर्तते। परन्तु व्यावृत्तिं करोति। काकैः गृहं पश्य इति वाक्ये काकाः उपलक्षणम्। यद्यपि काकाः गृहे न वर्तन्ते तथापि व्यावर्तने समर्थाः। यथा वा शाखायां चन्द्रः इत्युदारहणे शाखायाम् अविद्यमानमपि चन्द्रम् उपलक्षयति शाखा। अतः शाखा अत्र उपलक्षणम्।

विशेषणम्

उपाधिः विशेषणं च लक्ष्ये वर्तते एवञ्च व्यावृत्तिम् अपि कुरुतः। किञ्च यदा वर्तते तदा व्यावृत्तिं करोति। अर्थात् लक्ष्ये वर्तमानत्वे सति व्यावर्तकत्वम् उपाधिविशेषणयोः साधारणं लक्षणम् प्रतिभाति। इतोऽपि द्वयोः भेदः अस्ति।

लक्षणं किम् करोति। लक्षणम् एकस्य उद्देश्यस्य किमपि विधेयं बोधयति। यथा यत्र घटः ज्ञातः अस्ति परन्तु कीदृशः इति ज्ञातं नास्ति तदा घटः नीलः इति वाक्यम् घटम् उद्दिश्य नीलत्वम् विदधाति। अतः घटः उद्देश्यः नीलत्वम् च विधेयम्।

नीलः घटः नित्यः अनित्यो वा यो जानाति तं प्रति 'नीलो घटः अनित्यः' इति वाक्यम् उक्तम्। तस्मिन् घटः च उद्देश्यः, नीलत्वम् विशेषणम्, अनित्यत्वम् विधेयम् इति। तत्र यथा घटः अनित्यः तद्वत् तस्य नीलत्वम् अपि अनित्यम् इत्यपि बोधः जायते। नीलत्वम् उद्देश्ये घटे अन्वेति। उद्देश्यः यः घटः तस्य अनित्यत्वे अन्वयः (सम्बन्धः) भवति। एवञ्च नीलत्वस्य अपि अनित्यत्वे अन्वयः भवति। यतो हि नीलत्वमपि अनित्यम्।

अतः नीलत्वम् उद्देश्ये घटे अन्वेति। नीलत्वस्य स्वान्वितः घटः। घटस्य विधेयम् अनित्यत्वम्। नीलत्वम् स्वान्वितस्य घटस्य विधेये अन्वेति। अर्थात् नीलत्वम् स्वान्विताशं-विधेयान्वितम् अस्ति। नीलत्वम् घटे वर्तते। नीलत्वम् अमुम् घटम् इतरघटेभ्यः व्यावर्तयति। अतः नीलत्वे स्वान्वितांशविधेयान्वितत्वे सति वर्तमानत्वे सति व्यावर्तकत्वम् अस्ति। अतः नीलत्वम् विशेषणम् भवति। इदमेव विशेषणस्य लक्षणम्। **स्वान्वितांशविधेयान्वयित्वे सति वर्तमानत्वे सति व्यावर्तकत्वम् इति विशेषणस्य लक्षणम्।**

उपाधिः

कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। (शष्कुली हि कर्णविवरम्। नभः आकाशम्। अतः कर्णविवरावच्छिन्नम् आकाशम् श्रोत्रेन्द्रियम् इत्यर्थः।) अनेन वाक्येन श्रोत्रत्वम् विधेयम्, नभः उद्देश्यम् इति ज्ञायते। तत्र कर्णशष्कुली उपलक्षणं वा विशेषणं वा उपाधिः वा इति विचार्यते।

सर्वम् आकाशम् न श्रोत्रम्। किन्तु कर्णविवरद्वारा यद् ज्ञायते तत् आकाशम् श्रोत्रम्। यथा घटाकाशम् मठाकाशम् इति प्रयोगेन एकमेव आकाशम् घटसम्बन्धवशात् मठसम्बन्धवशात् भिन्नं भिन्नं प्रतीयते। तथा कर्णशष्कुली अन्यस्माद् आकाशात् शष्कुलीसम्बन्धम् आकाशम् पृथक् कृत्वा बोधयति, व्यावर्तयति। अतः कर्णशष्कुली व्यावर्तनं करोति। एवञ्च केवलम् व्यावृत्तम् आकाशमेव श्रोत्रम्। कर्णशष्कुली न श्रोत्रम्। अतः विधेये श्रोत्रत्वे आकाशस्य अन्वयः (सम्बन्धः) अस्ति किन्तु कर्णविवरस्य अन्वयः नास्ति। कर्णशष्कुली न श्रोत्रम्। अतः कर्णशष्कुली वर्तते। कर्णशष्कुली वर्तमाना सती तया सम्बन्धितस्य आकाशस्य अन्यस्मात् आकाशात् व्यावर्तनं करोति। आकाशं व्यावृत्य श्रोत्रत्वस्य सम्बन्धयोग्यं करोति। किन्तु स्वस्य येन आकाशेन अन्वयः तस्मिन् आकाशे यद् विधेयं श्रोत्रत्वं, तस्मिन् नान्वेति। अतः कर्णशष्कुली आकाशस्य विधेये अनन्विता, किन्तु वर्तमाना सति आकाशस्य आकाशान्तराद् व्यावर्तिका। अतः कर्णशष्कुली आकाशस्य उपाधिः भवति, न तु विशेषणम्। तथाहि - **स्वान्वितांशविधेयानन्वयित्वे सति वर्तमानत्वे सति व्यावर्तकत्वम् इति उपाधेः लक्षणम्।** अयेमव उपाधिविशेषणयोः भेदः यत् यस्य व्यावर्तनं कृतं तस्य विधेये विशेषणम् अन्वेति, उपाधिः नान्वेति। द्वयोरपि वर्तमानत्वे सति व्यावर्तकत्वम् तु अस्ति। तदेव सरलगिरा इत्थं प्रकट्यते - विशेषणं हि कार्यान्वयि व्यावर्तकं वर्तमानम्। उपाधिः हि कार्यानन्वयी व्यावर्तको वर्तमानश्च इति।

पण्डितपुत्रः मूर्खः इति उदाहरणे विधेयं मूर्खत्वम्, उद्देश्यः पुत्रः। पण्डितस्य पुत्रः। अतः पण्डितस्य स्वपुत्रे पुत्रत्वसम्बन्धेन अन्वयः भवति। पुत्रस्य मूर्खत्वेन अन्वयः भवति, किन्तु पण्डितस्य मूर्खत्वेन अन्वयः न भवति। पण्डितः न मूर्खः, पुत्र एव मूर्खः इति हेतोः। अतः स्वविशेष्यस्य विधेये अन्वयरहितः पण्डितः। अतः पण्डितः अत्र उपाधिः।

घटपटौ पश्य इत्यत्र घटस्य पटे अन्वयः अस्ति। एवञ्च पटस्य विधेया या दर्शनक्रिया तस्मिन् घटः अन्वेति। यतो हि घटोऽपि दर्शनस्य विषयः अस्ति। घटः तत्र वर्तमानः। अतः घटे वर्तमानत्वम् अस्ति। स्वान्वितः यः पटः तस्य विधेये अन्वयित्वम् अपि घटस्य अस्ति। घटः न पटस्य व्यावर्तकः। अतः लक्षणे यदि व्यावर्तकं पदं न स्यात् तर्हि घटः पटस्य विशेषणं भवेदिति आपत्तिः। अतः लक्षणे व्यावर्तकत्वं निवेश्यते।

पाठगतप्रश्नाः -४

३१. कति व्यावर्तकानि।

३२. उपलक्षणलक्षणं किम्।

३३. विशेषणलक्षणं किम्।

३४. उपाधिलक्षणं किम्।

३५. पण्डितपुत्रः मूर्खः इत्युदाहरणे पण्डितः उपाधिः उपलक्षणं विशेषणं वा।

३६. कर्णशष्कुली आकाशस्य उपाधिः विशेषणम् वा।

३७. नीलो घटः अनित्यः इत्युदाहरणे नीलत्वम् उपाधिः विशेषणम् वा।

५.६) प्रमा

प्रमायाः करणम् प्रमाणम्। अतः प्रमा का इति जिज्ञासा।

ज्ञानमेव प्रमा। अतः **ज्ञानत्वम् प्रमायाः लक्षणम्**। तत्र को दोषः इति प्रदर्श्यते।

राहोः शिरः इति प्रसिद्धं वाक्यम्। अत्र राहोः तस्य शिरसः भेदः प्रकटितो भवति। परन्तु अनयोः न कोऽपि भेदः। वस्तुतः शिरः एव राहुः, राहुः एव शिरः। तयोः भेदः वस्तुतः नास्ति एव। परन्तु एवम् वाक्यव्यवहारः लोके भवति एव। अस्य व्यवहारस्य अपलापः, तिरस्कारः कर्तुं न शक्यः। अस्माद् वाक्याद् ज्ञानं जायते एव। अस्मिन् ज्ञाने यः भासते सोऽयं भेदः यद्यपि अलीकः, अप्रसिद्धः पदार्थः, अस्य अभावः केवलान्वयी वर्तते तथापि ज्ञानं तु भवति। यद्यपि ज्ञानस्य कोऽपि विषयः नास्ति तथापि ज्ञानम् अङ्गीकर्तव्यम्। इदं ज्ञानं योगशास्त्रे विकल्पज्ञानं कथ्यते। इदं ज्ञानं न प्रमा। अधुना यद्विषयकं ज्ञानम् उत्पद्यते स विषयः यदि परं बाधितः भवति तर्हि तद् ज्ञानं भ्रमः कथ्यते। यथा मन्दान्धकारे रज्जौ सर्पत्वं दृश्यते। परन्तु प्रकाशे आनीते तु रज्जौ रज्जुत्वम् एव गृह्यते न तु सर्पत्वम्। अतः रज्जौ सर्पत्वज्ञानं तु भ्रमः एव। राहोः शिरः इत्यत्र तु भेदस्य यदा ज्ञानं भवति तदा अपि भेदः अलीकः अस्ति, बाधितः अस्ति इत्यपि ज्ञानम् अस्ति। अतः बाधबोधसमये उत्पन्नं ज्ञानं न भ्रमः। एवं सत्यपि राहोः शिरः इति व्यवहारे न कस्यापि विमतिः अस्ति, न कस्यापि विसंवादः अस्ति। अतः एव तद् ज्ञानं भ्रमभिन्नं प्रमाभिन्नं तृतीयं ज्ञानम् इति अङ्गीकर्तव्यम्।

अतः एव ज्ञानत्वम् इत्येव यदि प्रमायाः लक्षणं स्यात् तर्हि उक्तप्रकारेण राहोः शिरः इति अस्मिन् अर्थशून्ये ज्ञाने ज्ञानत्वम् अस्ति। तेन अस्मिन् ज्ञाने प्रमालक्षणस्य अतिव्याप्तिः स्यात्। अतः **अर्थविषयकज्ञानत्वम् प्रमायाः लक्षणं** क्रियते। अर्थः, वस्तु विषयः यस्य तद् अर्थविषयकं ज्ञानम्। विकल्पज्ञानं न अर्थविषयकज्ञानम्। तत्तु अर्थशून्यं ज्ञानम्, अलीकस्य ज्ञानम्, वस्तुभूतस्य ज्ञानन्नास्ति। अतः विकल्पज्ञाने नास्य प्रमालक्षणस्य अतिव्याप्तिः।

रज्जौ सर्पत्वस्य ग्रहणम्, शुक्तौ रजतत्वस्य ग्रहणम् इत्यादिषु उदाहरणेषु यद् ज्ञानं जायते तस्य कश्चित् विषयः तु अस्ति एव। निर्विषयम् अथवा अर्थशून्यं ज्ञानं नास्तीदम्। अस्य ज्ञानस्य विषयः सर्पत्वरजतत्वादिः अग्रे बाधितो भवति। अतः इदं ज्ञानं भ्रमः कथ्यते। इदं ज्ञानम् अर्थविषयकं ज्ञानम्। अस्मिन् ज्ञाने अर्थविषयकज्ञानत्वस्य सत्त्वात् प्रमालक्षणस्य तत्रातिव्याप्तिः। अतः **अबाधितार्थविषयकज्ञानत्वं प्रमायाः लक्षणम्** क्रियते। रज्जौ सर्पत्वं शुक्तौ च रजतत्वं बाधितं भवति।

अतः तद् ज्ञानं बाधितार्थविषयकं ज्ञानम्। तस्मिन् ज्ञाने अबाधितार्थविषकज्ञानत्वं नास्ति। अतः नास्य प्रमालक्षणस्य तत्रातिव्याप्तिः।

घटानुभवः जातः। ततः तेन संस्कारः उत्पन्नः। परं कदाचित् स संस्कारः उद्बुद्धः सन् स्मृतिं जनयति। अत्र या स्मृतिः तस्याः विषयः घटः। स च घटः न बाधितः। यावद् घटः अस्ति तावद् घटः घटत्वेन एव प्रतीयते। अतः घटस्य बाधः न भवति। स्मृतिविषयः घटः बाधितः नास्ति। अतः अबाधितः अर्थः घटः। तद्विषया स्मृतिः। स्मृतिः ज्ञानम्। इदं ज्ञानम् अबाधितार्थविषयकम् अस्ति। अतः अबाधितार्थविषयज्ञानत्वस्य तत्र सत्त्वात् प्रमालक्षणस्य तत्रातिव्याप्तिः। अतिव्याप्तिनिराकरणाय लक्षणस्य परिष्कारः आवश्यकः। अतः नूतनं लक्षणं प्रस्तूयते। तद्धि **अनधिगताबाधितार्थविषयकज्ञानत्वं प्रमायाः लक्षणम्**। यः अर्थः पूर्वं न ज्ञातः, न अधिगतः, सः अनधिगतः अर्थः। किञ्च यः अर्थः बाधितः नास्ति, सः अबाधितः अर्थः। अनधिगतार्थविषयकम्, अबाधितार्थविषयकं च ज्ञानं भवति अनधिगताबाधितार्थविषयकं ज्ञानम्। स्मृतिविषयः घटादिः तु पूर्वम् अनुभूतः एव। अर्थात् घटः स्मृतिपूर्वमेव अनुभवेन अधिगतः अस्ति। यः पूर्वं नानुभूतः तस्य स्मृतिः नैव भवति। अतः स्मृतिविषयः अधिगतः अस्ति, अनधिगतः नास्ति। अतः स्मृतौ अनधिगताबाधितार्थविषयकज्ञानत्वस्य असत्त्वात् नातिव्याप्तिः। स्मृतौ ज्ञानत्वं अस्ति, अर्थविषयज्ञानत्वम् अस्ति, अबाधितार्थविषकज्ञानत्वम् अस्ति, किन्तु अनधिगतार्थविषयकज्ञानत्वं नास्तीति अतिव्याप्तिः वारिता। अतः एव अव्याप्त्यतिव्याप्त्यसम्भवरूपदूषणत्रयरहितम् इदम् लक्ष्यायाः प्रमायाः असाधारणः धर्मः अपि अस्ति। अत एव **अनधिगताबाधितार्थविषयकज्ञानत्वं प्रमायाः लक्षणम्** इति सिद्धम्।

केषाञ्चिन्मते स्मृतिरपि प्रमा एव। तदा उक्तस्य प्रमालक्षणस्य स्मृतौ अव्याप्तिः भवति। स्मृतौ अबाधितार्थविषयकज्ञात्वस्य सत्त्वेऽपि अनधिगतार्थविषयकज्ञानत्वस्य अविद्यमानत्वात् अव्याप्तिः। अत एव अव्याप्तिवारणाय **अबाधितार्थविषयज्ञानत्वं प्रमायाः लक्षणं** क्रियते। इदं स्मृतिसाधारणं लक्षणम्। स्मृतिविषयः अनुभवेन अधिगतः भवति, परन्तु यदि बाधितः नास्ति तर्हि तादृशार्थविषयकं ज्ञानं तु अबाधितार्थविषयकं ज्ञानम्। अतः स्मृतौ अबाधितार्थविषयकज्ञानत्वस्य सत्त्वात् नाव्याप्तिः।

सर्वाणि शास्त्राणि स्वसिद्धान्तानुकूलत्वेन प्रमेयाणि उपस्थापयन्ति। अतः अनुभूयमानस्य जगतः एव पदार्थाः विभिन्नैः नामभिः विभिन्नैश्च लक्षणैः प्रतिपाद्यन्ते। तदा शास्त्रेषु बहुत्र विरोधाः परिलक्ष्यन्ते। यदा किमपि शास्त्रम् कञ्चित् सिद्धान्तम् अभ्युपगच्छति तदा तस्मिन् बहवः दार्शनिकाः आक्षेपादिकं कुर्वन्ति। अतः तत्समाधानाय सिद्धान्तिना प्रयासो विधीयते। तत्र सर्वसम्मता परार्थानुमानपद्धतिः अवलम्ब्यते।

नैयायिकानाम् आक्षेपः -१ तत्समाधिश्च

न्यायमते सर्वमपि ज्ञानं क्षणिकम्। अर्थात् एकक्षणस्थायि इति। धारावाहिकज्ञाने न्यायमते प्रथमं द्वितीयं तृतीयम् इत्यादिज्ञानमपि प्रमा। परन्तु द्वितीयतृतीयज्ञानादौ प्रोक्तलक्षणस्य अव्याप्तिः। तथाहि - धारावाहिकं ज्ञानम् - निरन्तरम् समानो घटः एव ज्ञानस्य विषयः भवति। अर्थात् प्रथमक्षणे द्वितीयक्षणे तृतीयक्षणे च समानम् घटं पश्यति तदा प्रथमक्षणे ज्ञातः अधिगतः घटः एव द्वितीयक्षणे ज्ञानस्य विषयः

भवति। एवं प्रथमक्षणे द्वितीयक्षणे च ज्ञातः अधिगतः घट एव तृतीयक्षणे ज्ञानस्य विषयः भवति। प्रथमक्षणे यद् घटज्ञानम् तस्मिन् तु प्रोक्तं प्रमालक्षणम् समन्वेति। परन्तु द्वितीयक्षणे यद् ज्ञानम् तत्र अव्याप्तिः भवति। यतो हि द्वितीयक्षणे ज्ञानस्य विषयः घटः अनधिगतः नास्ति, स तु प्रथमक्षणे अधिगतः अस्ति। अतः द्वितीयतृतीयादिज्ञानेषु अनधिगतार्थविषयकत्वं नास्ति, केवलम् अबाधितार्थविषयकत्वम् अस्ति। अतः लक्षणस्य अव्याप्तिः इति आक्षेपः।

विशेषणभेदे विशिष्टं भिद्यते। अर्थात् गतिमान् जनः इति ज्ञाने गतिः विशेषणम् अस्ति, जनः च विशेष्यः अस्ति। यदि परक्षणे स जनः गतिविरामं करोति तदा स्थितिवान् जनः इति ज्ञानम् उत्पद्यते। तस्मिन् स्थितिः विशेषणम् अस्ति, जनः विशेष्यः अस्ति। गतिमान् जनः, स्थितिमान् जनः इति अनयोः ज्ञानयोः विषयौ भिन्नौ। विशेष्यः जनः स एव तथापि विशेषणं भिन्नम् अस्ति। अतः विषयद्वयं भिन्नमेव गण्यते सर्वैरपि।

अधुना घटं पश्यामि, अधुना शब्दं शृणोमि, अधुना घटं स्पृशामि इत्यादिप्रत्यक्षं सर्वेषां भवति। तत्र अधुना घटं पश्यामि इत्यत्र न केवलं घटः भासते अपि तु कालोऽपि भासते। यदि कालो न भासेत, कालः ज्ञानविषयः न भवति तर्हि एतत्कालवृत्तिघटविषयकज्ञानवान् अहम् इति अनुव्यवसाये कालः विशेषणत्वेन न प्रतीयेत। (प्रथमज्ञानस्य ज्ञानम् अनुव्यवसायः। ज्ञानविषयकं ज्ञानम् अनुव्यवसायः।) अपि च घटः वर्तमानः न वा इति घटस्थितेः कालस्य ज्ञानमपि न भवेत्। परन्तु घटस्य वर्तमानत्वं तु ज्ञायते। क्रियायाः कालविषये न कस्यापि सन्देहो भवति। अतः कालस्तु ज्ञाने भासते इति अभ्युपगन्तव्यमेव। येन केनापि इन्द्रियेण यदा ज्ञानं भवति तदा अधुना इदम् अनुभवामि इति ज्ञानं भवति। अतः कालः सर्वेन्द्रियग्राह्यः।

अतः धारावाहिकज्ञाने प्रथमक्षणविशिष्टः घटः इति प्रथमज्ञानस्य विषयः। तदा द्वितीयक्षणः नास्ति। अतः प्रथमज्ञाने द्वितीयक्षणः न भासते। एवं तृतीयक्षणः अपि न भासते। द्वितीयज्ञाने द्वितीयक्षणविशिष्टः घटः ज्ञानस्य विषयः भवति। तदा तृतीयक्षणः नास्ति। अतः तस्मिन् तृतीयादिक्षणाः न भासन्ते। प्रथमज्ञाने प्रथमक्षणः विशेषणम् अस्ति, द्वितीयक्षणः विशेषणं नास्ति। द्वितीयज्ञाने द्वितीयक्षणः विशेषणम् अस्ति, प्रथमक्षणः विशेषणं नास्ति। अतः प्रथमज्ञानस्य विषयः द्वितीयज्ञानस्य विषयाद् भिन्नः। द्वितीयज्ञानस्य विषयः प्रथमज्ञानस्य विषयाद् भिन्नः। प्रतिक्षणं तत्तत्क्षणविशिष्टः घटः अर्थः अनधिगतः एव अस्ति, न तु अधिगतः। एवम् धारावाहिकज्ञानेऽपि प्रतिक्षणं विषयः अनधिगतः अस्ति। अतः अनधिगतार्थविषयकत्वम् अबाधितार्थविषयकत्वं च ज्ञाने वर्तते इति न अव्याप्तिः इति प्रथमं समाधानम्।

द्वितीयं समाधानं तु मधुसूदनसरस्वतीकृतमस्ति। धारावाहिकज्ञानस्थले द्वितीयादिज्ञानं तु ज्ञातस्य अर्थस्य ज्ञापकमात्रम्। अतः अनुवादमात्रम्। न तु अज्ञातस्य ज्ञापकम्। अज्ञातस्य ज्ञापिका खलु प्रमा। अतः अनुवादे प्रमात्वस्य प्रयोजकम् अज्ञातज्ञापकत्वं नास्ति। अतः द्वितीयादिज्ञानं प्रमा नास्ति। अतः तत्र लक्षणागमनम् युक्तमेव।

नैयायिकानाम् आक्षेपः -२ तत्समाधिश्च

शुक्तेः रजतरूपेण भानं, रज्जोः सर्परूपेण भानं तु लोके प्रसिद्धमेव। शुक्तेः अज्ञानावृतः अंशः रजतत्वेन प्रतीयते। रज्जोः अज्ञानावृतः अंशः सर्पत्वेन प्रतीयते। एवम् ब्रह्मणः अज्ञानावृतान् विभिन्नान् अंशान् बद्धपुरुषः घटपटादिरूपेण गृह्णाति। अतः यथा सर्पादिकं मिथ्या तथा इदं परिदृश्यमानं जगद् अपि मिथ्या।

शुक्तित्वसाक्षात्कारेण रजतत्वस्य विलोपः भवति। प्रौढप्रकाशे रज्जुत्वसाक्षात्कारेण सर्पत्वस्य विलोपः भवति। रजतत्वादिकं बाधितम् भवति। तथा श्रवणमननादिना ब्रह्मसाक्षात्कारे सर्वं खल्विदं ब्रह्म (छा.उ. ३.१४.१) इत्याकारकं ज्ञानम् उत्पद्यते। तदा घटपटादीनाम् विलोपः भवति। घटादिकं बाधितम् भवति। तदा ब्रह्मचैतन्यं प्रकाशते। तत्र अन्यद् वस्तु न विद्यते। अयं वेदान्तसिद्धान्त एव।

अमुं सिद्धान्तम् आश्रित्य नैयायिकः आक्षिपति यत् वेदान्तमते तु घटादिकं मिथ्या अर्थात् ब्रह्मज्ञानेन बाधितं भवति। अतः घटज्ञानं तु बाधितार्थविषयकं ज्ञानम्। अतः घटादिविषयकं ज्ञानम् यद्यपि अनधिगतार्थविषयकं स्यात् तथापि अबाधितार्थविषयकं नास्ति। अतः घटादिविषयकज्ञाने प्रमालक्षणस्य अव्याप्तिः।

सिद्धान्ती समाधत्ते - सत्यम्। परन्तु अबाधितार्थविषयकं ज्ञानम् इत्यत्र संसारदशायाम् अबाधितः अर्थः इति तात्पर्यम् अस्ति। घटादिकं संसारकाले न कस्यापि बाधितं भवति। ब्रह्मसाक्षात्कारानन्तरमेव बाधितं भवति। अतः प्रोक्तलक्षणे न कश्चिद्दोषः। स्पष्टप्रतिपत्तये इत्थं वक्तुं शक्यते यद् अनधिगतार्थविषयकं ज्ञानम्, एवञ्च संसारदशायाम् यः अबाधितार्थः तद्विषयकं ज्ञानम् एव प्रमा इति।

यथा एक एव चन्द्रः अस्ति तथापि चक्षुर्दोषवशात् द्वितीयचन्द्रस्य दर्शनं कस्यचित् भवति। यत्र चन्द्रे भेदः नास्ति तत्र चक्षुर्दोषकारणेन भेदानुभवः भवति।

ब्रह्मसाक्षात्कारानन्तरं घटादीनां बाधः भवति। तत्र श्रुतिः प्रमाणम् - यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येद् इत्यादि। (यदा ब्रह्मज्ञस्य पुरुषस्य समस्तप्रपञ्चः ब्रह्मरूपः तदा केन इन्द्रियेण कं विषयं पश्येत्। अर्थात् यत्र रज्जौ सर्पत्वस्य भासः भवति तत्र रज्जुदर्शनेन सर्पत्वादिकं न दृश्यते। तदा संसारदशायाम् ब्रह्मणि जगतः भासः भवति। परन्तु ब्रह्मदर्शनेन जगत् न दृश्यते।)

संसारदशायां घटादीनां बाधः न भवति। तत्र श्रुतिः प्रमाणम् - यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति इति। (यदा वस्तुतः द्वैतं नास्ति तथापि अज्ञानवशात् द्वैतम् इव कल्पिताः भेदाः भवन्ति। तदा ब्रह्मभिन्नः जीवः जगत् कर्तृकर्मकारकफलादिरूपेण भिन्नं पश्यति।

इत्थम् एतावता प्रमालक्षणं किमिति ऊहापोहपुरःसरम् आलोचितम्।

अग्रे प्रमाणानि आलोचयिष्यन्ते।

[**विमर्शः** - अनधिगतार्थविषयकज्ञानत्वम् इति विशेषणं स्मृतौ अतिव्याप्तिवारणाय। अबाधितार्थविषयकज्ञानत्वम् इति विशेषणं भ्रमे अतिव्याप्तिवारणाय इति आलोचितमेव। वेदान्तमते तु अज्ञानस्य निवर्तकमेव ज्ञानं भवति। स्मृतिः भ्रमो वा अज्ञानस्य निवर्तनं न करोति। अतः स्मृतौ भ्रमे च

ज्ञानत्वं नास्त्येव। स्मृतिः भ्रमश्च अज्ञानवृत्तिः, न तु प्रमाणवृत्तिः। अद्वैतमते प्रमालक्षणन्तु अज्ञातार्थविषयकनिश्चयत्वम् इति।]

पाठगतप्रश्नाः -५

३८. राहोः शिरः इत्यत्र ज्ञानस्य विषयः कः।

३९. प्रमायाः परिष्कृतं लक्षणं किम्।

४०. येषां मते स्मृतिरपि प्रमा तेषां मते प्रमालक्षणं किम्।

४१. ज्ञानं क्षणिमेव इति केषां मतम्।

४२. विशेषणभेदेन विशिष्टं भिद्यते न वा।

४३. अधुना घटं पश्यामि इति ज्ञाने कालः भासते न वा।

पाठसारः

इदं प्रमाणप्रकरणम्। प्रमाणप्रकरणस्य अयं प्रथमः पाठः। प्रमाणस्य आलोचनाय बहूनां पारिभाषिकपदानां ज्ञानम् आवश्यकं भवति। तेषां पदानां यथा अत्र काम्यते तथा उपस्थापनं प्रायः अन्यत्र पाठेषु न भवति। अतः अस्मिन् प्रमाणानां प्रथमे पाठे तादृशविषया बाहुल्येन संकलिताः सन्ति।

दर्शनशब्दे यो ल्युट् प्रत्ययः तस्य विभिन्नान् अर्थान् आदाय दर्शनशब्दस्य प्रमाणं प्रमाता प्रमेयम् प्रमा च इत्येते चतुर्धा अर्थाः भवन्ति इति आलोचितम्। शास्त्रं किं भवति। मर्त्यस्य नित्ये प्रवृत्तिम् उपदिशति विदधाति, अनित्ये निवृत्तिम् उपदिशति तत् शास्त्रम्।

विपुलानि दर्शनानि। दर्शनानाम् आस्तिकनास्तिकभेदेन विवरणमत्र पाठे प्रस्तुतमस्ति। दर्शनभेदेन प्रमाणभेदोऽपि परिलक्ष्यते। अतः कस्य दर्शनस्य कानि प्रमाणानि इति विषयः अस्मिन् पाठे संक्षेपेण प्रतिपादितः।

पुरुषार्थपरः पुरुषः। धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः। धर्मार्थौ गौणौ, काममोक्षौ मुख्यौ। कामः अनित्यः मोक्षः नित्यः। अतः मोक्षः परमः पुरुषार्थः। स च ब्रह्मज्ञानाद् भवति।

किं ज्ञानम् इति विषये व्यवहारे या भ्रान्तिरस्ति तामुन्मूल्य शास्त्रेषु ज्ञानम् किम् इति प्रतिपादितमस्मिन् पाठे। अनुभवस्मृतिभेदेन ज्ञानस्य द्वैविध्यम्। तत्र अनुभवः संस्कारं जनयति, संस्कारश्च उद्बुद्धः सन् स्मृतिं जनयति।

कस्यापि पदार्थस्य परिचयः तस्य लक्षणेन भवति। लक्षणम् असाधारणः धर्मः भवति। लक्षणे अव्याप्तिः अतिव्याप्तिः असम्भवः इति दोषत्रयं सम्भवति। ते दोषा अत्र पाठे उल्लिखिताः।

वेदान्ते उपलक्षणम् उपाधिः विशेषणम् इति शब्दानां प्रयोगस्य प्राचुर्यम् अस्ति। अतः एतेषामपि सविस्तरमालोचनमत्र दत्तमस्ति।

प्रमा इति स्थानतः वस्तुतः विषयस्य प्रारम्भः वर्तते। इतः पूर्वं सर्वमपि प्रस्तुत्यर्थमासीत्। अनधिगताबाधितार्थविषयकज्ञानत्वं प्रमायाः लक्षणम् इति प्रतिपादितम्। यः अर्थः पूर्वं न ज्ञातः, न अधिगतः, सः अनधिगतः अर्थः। किञ्च यः अर्थः बाधितः नास्ति, सः अबाधितः अर्थः। अनधिगतार्थविषयकम्, अबाधितार्थविषयकं च ज्ञानं भवति अनधिगताबाधितार्थविषयकं ज्ञानम्। तत्त्वम् प्रमायाः लक्षणम्। एवम् सरलार्थं विव्रिय तत्र दलकृत्यम् अपि प्रदर्शितमस्ति। अस्मिन् लक्षणे ये दोषाः आक्षेपाः च स्युः तेषामपि निवारणं प्रदर्शितमस्ति।

पाठान्तप्रश्नाः

१. दर्शनशब्दस्य व्युत्पत्तिभेदात् अर्थभेदान् उपस्थापयत।

२. किं शास्त्रम्।

३. दर्शनभेदान् प्रकटयत।

४. कस्य दर्शनस्य कानि प्रमाणानि इति लिखत।

५. पुरुषार्थं सयुक्ति विशदयत।

६. पुरुषार्थान् विव्रिय मोक्षस्य परमत्वम् प्रतिपादयत।

७. कः पदार्थः।

८. सामान्यतः ज्ञानं कथमुत्पद्यते।

९. लक्षणलक्षणं विव्रिताम्।

१०. लक्षणलक्षणदोषाः के। सलक्षणोदारणं प्रतिपाद्याः।

११. दलकृत्यं किम्।

१२. उपाधिलक्षणे व्यावर्तकत्वस्य सार्थक्यम् उपपादयत।

१३. उपलक्षणलक्षणं प्रदाय उपपादय।

१४. विशेषणलक्षणं प्रदाय उपपादय।

१५. उपाधिलक्षणं प्रदाय उपपादय।

१६. उपाधिविशेषणयोः भेदः कः।

१७. प्रमालक्षणं सदलकृत्यं परिष्कुरुत।

१८. कालः ज्ञाने भासते इति सयुक्ति प्रतिपादयत।

१९. धारावाहिकज्ञाने प्रतिक्षणं विषयः कथम् अनधिगतः।

पाठगतप्रश्नानाम् उत्तराणि

१. दृशिः प्रेक्षणे इति धातोः ल्युट्-प्रत्यययोगेन दर्शनशब्दः निष्पद्यते।

२. ३

३. ४

४. १

५. ४

६. २

७. १-ग, २-घ, ३-ख, ४-क, ५-च, ६-ङ

\-

८. सुखम्।

९. दुःखम्।

१०. नित्यानित्यभेदेन सुखं द्विविधम्।

११. आत्मसुखम्।

१२. जन्यसुखमनित्यम्।

१३. धर्मः पुण्यम् वा।

१४. अधर्मः पापम् वा।

१५. 'इदं मदिष्टसाधनम्' इति ज्ञानम् प्रवृत्तिं प्रति कारणं भवति।

१६. अर्थ्यते इति अर्थः। पुरुषस्य अर्थः पुरुषार्थः। अथवा पुरुषेण अर्थ्यते स पुरुषार्थः। अर्थात् पुरुषः नरो वा नारी वा यद् कामयते इच्छति अर्थयते स एव पुरुषार्थः।

१७. धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः।

१८. धर्मार्थौ गौणौ। मुख्यौ तु काममोक्षौ पुरुषार्थौ।

१९. नित्यत्वम्।

२०. मोक्षः ब्रह्मज्ञानाद् भवति।

\-

२१. स्मृतिभिन्नं ज्ञानमनुभवः।

२२. अनुभवः अपेक्षाबुद्धिवशात् अन्तःकरणे तथा गुणमुत्पादयति यः उद्बोधकसहकारेण स्मृतिं जनयति स गुणः एव संस्कारः। अनुभवजन्यः स्मृतिहेतुः संस्कारः।

२३. बहिरिन्द्रियेण यद् ज्ञानं न जायते, किन्तु केवलं संस्कारः उद्बुद्धः सन् यद् ज्ञानं जनयति तद्

ज्ञानमेव स्मृतिः।

२४. ज्ञानस्य यो विषयः सः अर्थः पदार्थः ज्ञेयः ज्ञातव्यः प्रमेयः वा कथ्यते।

२५. अपेक्षाबुद्धिसहकृतः अनुभवः संस्कारं जनयति।

२६. लक्ष्ये लक्षणम् अस्ति चेत् लक्षणसमन्वयः कथ्यते।

२७. यस्मिन् धर्मे अव्याप्तिः अतिव्याप्तिः असम्भवः इति त्रयो दोषाः न भवन्ति स एव असाधारणः धर्मः।

२८. लक्ष्यैकदेशवृत्तित्वे सति लक्ष्यापरदेशावृत्तित्वम् अव्याप्तेः लक्षणम्।

२९. यावल्लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वम् अतिव्याप्तेः लक्षणम्।

३०. लक्ष्यमात्रावृत्तित्वम् असम्भवस्य लक्षणम्।

-

३१. उपलक्षणम् उपाधिः विशेषणम् इति एतत् त्रयमपि व्यावर्तकम् भवति।

३२. अवर्तमानत्वे सति व्यावर्तकत्वम् उपलक्षणस्य लक्षणम्।

३३. स्वान्वितांशविधेयान्वयित्वे सति वर्तमानत्वे सति व्यावर्तकत्वम् इति विशेषणस्य लक्षणम्।

३४. स्वान्वितांशविधेयानन्वयित्वे सति वर्तमानत्वे सति व्यावर्तकत्वम् इति उपाधेः लक्षणम्।

३५. उपाधिः।

३६. उपाधिः।

३७. विशेषणम्

-

३८. राहोः शिरः इत्यत्र ज्ञानस्य राहुशिरसोः भेदः यश्च अप्रसिद्धः पदार्थः अस्ति।

३९. अनधिगताबाधितार्थविषयकज्ञानत्वं प्रमायाः लक्षणम्।

४०. अबाधितार्थविषयज्ञानत्वं प्रमायाः लक्षणम्।

४१. न्यायमतम्।

४२. भिद्यते।

४३. भासते।

॥ इति पञ्चमः पाठः ॥